International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2018; 4(5): 150-151
© 2018 IJSR
www.anantaajournal.com
Received: 26-07-2018
Accepted: 29-08-2018

**डॉ0 उपेन्द्र साहु**
गवेषक, स्नातकोत्तरसाहित्यविभागः
कामेश्वरसिंहदरभंगासंस्कृत
विश्वविद्यालयः दरभंगा, बिहार, भारत

**Corresponding Author:**
**डॉ0 उपेन्द्र साहु**
गवेषक, स्नातकोत्तरसाहित्यविभागः
कामेश्वरसिंहदरभंगासंस्कृत
विश्वविद्यालयः दरभंगा, बिहार, भारत

# संस्कृतसाहित्यस्य नित्यनूतनोद्भावपरिपाकः

**डॉ0 उपेन्द्र साहु**

**प्रस्तावना**

मन्ये विविधशास्त्रनिष्णातस्य विलक्षणप्रतिभाप्रदीप्तस्य मिश्रमहोदयस्य साहित्यसरणिमधिकृत्य विहितस्य विशालकायस्यास्य महाकाव्यस्य अनुसन्धानेन सीतारामविषयकमैतिह्यं सर्वथा नवीनं सन् ऐतिह्यमेकं तथ्यं प्रस्तोष्यन्तीति। अत्र शोधकार्ये शोधधिया काव्यस्य सर्वे पक्षाः सर्वथा नूतनविधिना समुद्घाटिता भविष्यन्ति।

किं बहुना सर्जनात्मकेन लेखनेन सम्पादनेन च संस्कृत–साहित्ये नूतनं जीवनं सञ्चारयितुं महान् प्रयासो विहितः। वस्तुतस्तु संस्कृते विदुषां वर्गद्वयमभूत्। एको वर्गोऽभूत् पाश्चात्यशोधपरम्पराप्रभावितस्य यः खलु संस्कृतमन्यान्यप्राच्यभाषावत् क्लासिकलभाषां मत्वा तस्यानुसन्धानस्य प्राच्यविद्याविषयकस्य शोधस्य च क्षेत्रमेवापश्यत्। इतरो वर्ग आसीत् संस्कृतविद्यावतां वर्गः। अत्र वर्गाधिष्ठितो जनः मातृभाषावद् संस्कृतं भाषते स्म, जीवितां जाग्रतीं च भाषाम् अमन्यत। मिश्रमहोदयो द्वितीयवर्गाश्रितो विद्वान् अभूत्।

तथा च संस्कृतसाहित्ये सर्जनात्मकस्य लेखनस्य सम्पादनस्य च या दृष्टिः प्रदत्ताऽनेन विदुषा सा इदानीमपि संस्कृतस्य विकासाय प्रतिष्ठितं स्थानं लभते। एतन्निर्मिता आलेखा निबन्धाश्च बहुत्र सम्मानिताः पुरस्कृताश्च सञ्जाताः। सम्प्रति नैकेषां विश्वविद्यालयानां संस्कृतविभागे एतन्निर्मिता ग्रन्थाः पाठ्यन्ते सभाज्यन्ते च। एवञ्च प्रतीयते यत् साहित्य–सेवा –पुस्तकलेखनादिकार्येभ्यश्च नायं जनः कदापि विमुखो बभूवेति। एतस्यैव परिणामो वर्तते यत् एषां महानुभावानां लिखिताः समे ग्रन्थाः प्रकाशिताः सञ्जाताः। तत्र राष्ट्रियसंस्कृतसंस्थानतोऽनेके ग्रन्थाः प्रकाशिताः सन्ति। विविधासु पत्र–पत्रिकास्वपि प्रकाशिताः निबन्धाः दृश्यन्ते। इयान् तु विशेषो वर्तते यद् अनवरतसाहित्यसर्जनासत्रसमासक्तोऽपि निःस्वार्थसरस्वतीसेवापरायणः सञ्जातः। साहित्यसर्जनाप्यनेन विदुषा न कस्मैचिल्लोभाय, न वा यशोलिप्सया, न वा कस्यचन बन्धनेन प्रेरणया वा परिचालिता आसीत् अपितु काचनान्तःप्रेरणयैव प्रादुर्भूताऽऽसीत्। तथा चास्य महानुभावस्य कृतविद्यस्य सर्वथा नित्यनूतनोद्भवनाक्षमत्वमिति।

**संस्कृतस्य अद्याप्युपयोगित्वम् –**

भारते संस्कृतस्य अध्ययनाध्यापनयोर्यादृशी प्रणाली यादृशी परिस्थितिर्यादृशी वा दत्तचित्तता स्वातन्त्र्यात् पूर्वमासीत् असौभाग्यात् तादृशी स्थितिरिदानीं नास्ति। आधुना प्रश्नोऽयं बहुधा पृच्छ्यते– 'किमर्थं वैज्ञानिकेऽस्मिन् युगे संस्कृतमध्येतव्यम् ? इति। यदि नाम संस्कृते किमपि तादृशं वस्तु नास्ति यदर्थम् एतस्याध्ययनमावश्यकं स्यात् तर्हि एतदध्ययने किमर्थं कालो यापनीयः ? एवंविध–विविध–जिज्ञासा–कृतां पुरतः किञ्चिन्निवेद्यम् –

**संस्कृते निहितानां विद्यानां परिज्ञानार्थं तदध्ययनं परमावश्यकम् : –**

साधारणतया विद्या द्विविधा। परा अपरा च। तत्र ब्रह्मसाक्षात्कार– सम्पादिका विद्या परा। लौकिक–पारलौकिकाभ्युदयानुकूल– विधि– विधानो– पदेशकारिका विद्या अपरा।

**शुक्राचार्यस्य मते तु –**

''यत् तत् स्यात् वाचिकं सम्यक् कर्म विद्याभिसंज्ञितम्[1]''

1. शुक्रनीतिः अध्यायः 4।

इत्यादिना सम्यग् वाचिकं कर्म विद्या। सा च बहुप्रभेदापि मुख्यतो द्वात्रिंशद्विधा। तत्र ऋग्यजुः सामथर्वरूपाश्चत्वारो वेदाः, आयुर्वेद– धनुर्वेद– गान्धर्ववेद–तन्त्र रूपाश्चत्वार उपवेदाः, शिक्षा–कल्प–व्याकरण– निरुक्त– छन्दो– ज्योतिषरूपाणि षड्वेदाड्.गानि, मीमांसा–न्याय– वैशेषिक– सांख्य– योग– वेदान्तरूपाणि षड्दर्शनानि तथा इतिहास– पुराण– स्मृति– नास्तिक– मतार्थशास्त्र– कामशास्त्र– शिल्पशास्त्र– देशभाषावरोक्ति– यवन मत– देशादिधर्म– रूपाणि द्वादशशास्त्राणि।

पुराणेषु ब्रह्म–पद्म–विष्णु–शिव– श्रीमद्भागवत– नारद– मार्कण्डेयाग्नि– भविष्य –ब्रह्मवैवर्त– लिड्.ग– वराह–स्कन्द–वामन–वायु– कूर्म– मत्स्य–ब्रह्माण्ड– नामकानि अष्टादश पुराणानि तथा सनतकुमार– नरसिंह– बृहन्नारदीय– शिवधर्म–दुर्वासस– कापिल– मानवौशनस– वारुण– कालिका– साम्ब– नन्दकेश्वर– सौर– पाराशरादित्य– ब्रह्माण्ड– माहेश्वर– भागवत– वासिष्ठ– कौर्म– भार्गवादि– मुद्गल– कल्लि– देवीमहाभागवत– बृहद्धर्म– परानन्द– पशुपतीत्यादीनि अनेकानि उपपुराणानि विलसन्ति।

सामाजिकनियम– विधि– न्यायादि– व्यवस्थापिकाः मन्वत्रि– विष्णु– हारीत– याज्ञवल्क्यो–शनोऽड्.गरोयमापस्तम्ब– संवर्त– कात्यायन– बृहस्पति– पराशर– व्यास– शङ्ख– लिखित– दक्ष– गौतम– शातातप– वसिष्ठानां विंशतिः मुख्याः स्मृतयः विधि–विषयक– सूक्ष्म–विचारान् विदधति।

अर्थशास्त्रम्, कामशास्त्रम्, शिल्पशास्त्रम्, काव्यम्, काव्याशास्त्रं च तत्तद्विषयकं सविस्तरं सुगम्भीरं च विवेचनं कुर्वन्ति।

अवसरोक्तिविद्यापि वैदेशिक–कूटनीति–विभागे नियुक्तानां कृते अतीव सहायिका भवति। एतद्विद्यायां निपुणाः कूटनीतिज्ञाः स्वकार्ये अतीव सफला भवन्ति। यावनमताख्यं तच्छास्त्रं वर्तते यत्र जगतः कारणमीश्वरः सर्वदा अदृश्य एव। यत्र श्रुतिसमृत्योर्मार्गमननुसरन्नपि धर्मः सुव्यवस्थितः [2]। एवं हि चार्वाक– यावनादिदर्शनमपि विचारपथे विराजमानमासीत्।

देशादिधर्म– प्रतिपादक– शास्त्रम [3]– देशजाति– कुलाचार– व्यवहाराणां परम्परागतानां तथैवानुष्ठानमावश्यकमिति प्रतिपादयति।

उपर्युक्ताभ्यो द्वात्रिंशतो विद्याभ्यः अतिरिक्तान्यपि संस्कृते बहूनि समाजोपयुक्तानि व्यावहारिकाणि शास्त्राणि सन्ति। योगियाज्ञवल्क्यनामके प्राचीने ग्रन्थे वर्णिताः पाञ्चरात्र–कापिलापान्तरतम–ब्रह्मिष्ठ–पाशुपत– हैरण्यगर्भ– शैवनामकाः सप्त सिद्धान्ताः सन्ति, महाभारते शान्तिपर्वणि महेश्वरप्रोक्तानि त्रीणि शतानि शास्त्राणि सप्ततिः महातन्त्राणि च सन्ति।

लोकतन्त्रम्, लोकायतशास्त्रम्, धनुर्वेदसूत्रम्, औशनसधनुर्वेदः, भारद्वाजधनुर्वेदः, जमदग्नि–धनुर्वेदः, व्यूहशास्त्रम्, रथसूत्रम्, अश्वसूत्रम्, नकुलस्य अश्वशास्त्रम्, हस्तसूत्रम्, लोमपादकृत– हस्ति–सूत्रम्, हस्त्यायुर्वेदः, शालिहोत्र–नामकम् अश्वचिकित्साशास्त्रम्, यन्त्रसूत्रम्, विश्वकर्म–प्रोक्त– यन्त्र– मात्रिका, वाणिज्यशास्त्रम्, गन्धशास्त्रम्, कृषिशास्त्रम्, सस्यवेदः, पशुपाल्यशास्त्रम्, गो–वैद्यकम्, गोलक्षणम्, वृक्षायुर्वेदः, तक्षशास्त्रम्, मल्लशास्त्रम्, वास्तुशास्त्रम् [4], वाकोवाक्यम्, चित्रसूत्रम्, लिपिशास्त्रम्, मानशास्त्रम्, धातुशास्त्रम्, संख्याशास्त्रम्, हीरकसूत्रम्, अदृष्टशास्त्रम्, शिल्पशास्त्रम्, मायायोगवेदः, माणवविद्या, सूदशास्त्रम्, द्रव्यशास्त्रम्, मत्स्यशास्त्रम्, वायसविद्या, सर्पविद्या, चौरशास्त्रम्, इत्यादीनि शतशः शास्त्राणि संस्कृते निबद्धानि सन्ति, येषामुल्लेखः महाभारत–पुराणादौ समुपलभ्यते। एतदतिरिक्तम् ब्रह्मानन्द– सहोदर–रसास्वादानुभावकम् विपुलं विशालं खण्डकाव्यम्, महाकाव्यम्, रूपकम्, उपरूपकम्, कथाख्यायिकादि– साहित्यम्, अनेककोशादि–ग्रन्थाः, चतुःषष्टिकला–प्रतिपादकग्रन्थाश्च संस्कृते विराजन्तेतराम्। यस्मिन् संस्कृते समाजोपयोगीनि एतानि विविधानि शास्त्राणि विपुलं च साहित्यम् अनेकाश्च कला विद्यन्ते तस्य संस्कृतस्य समयानुकूलता–विषये प्रश्नः हास्यावहः। संस्कृताध्ययनमन्तरा कथमेतेषामुपयोगिनां विषयाणां ज्ञानं सुलभं स्यात् ? अत एतेषां परिज्ञानार्थं संस्कृताध्ययनं सर्वथावश्यकम्।

2. ईश्वरः कारणं यत्रादृश्योऽस्ति जगत् सदा।
श्रुतिस्मृती विना धर्माधर्मौ स्तस्तच्च भावनम्।।
श्रुत्यादिभिन्नधर्मोऽस्ति यत्र तद् यावनं स्मृतम्।। शुक्रनीतिः।
3. कल्पितः श्रुतिमूलो वा मूलो लोकैर्धृतः सदा।
देशादिधर्मः स ज्ञेयो देशे देशे कुले कुले।।
यस्मिन् देशे य आचारो व्यवहारः कुलस्थितिः।
तथैव परिपाल्योऽसौ यदावशमुपागतः।।
4. भृगुरत्रिर्वसिष्ठश्च विश्वकर्मा मयस्तथा।
नारदोनग्नचिच्चैव विशालाक्षः पुरन्दरः।
ब्रह्मा कुमारो नन्दीशः शौनको गर्ग एव च।
वासुदेवोऽनिरुद्धश्च तथा शुक्रबृहस्पती।।
अष्टादशैते विख्याता वास्तुशास्त्रोपदेशकाः।।
मत्स्यपुराणे–252/2–4।

## सन्दर्भ –सूची


1. शुक्रनीतिः अध्यायः 4।
2. ईश्वरः कारणं यत्रादृश्योऽस्ति जगत् सदा। श्रुतिस्मृती विना धर्माधर्मौ स्तस्तच्च भावनम्।। श्रुत्यादिभिन्नधर्मोऽस्ति यत्र तद् यावनं स्मृतम्।। शुक्रनीतिः।
3. कल्पितः श्रुतिमूलो वा मूलो लोकैर्धृतः सदा। देशादिधर्मः स ज्ञेयो देशे देशे कुले कुले।। यस्मिन् देशे य आचारो व्यवहारः कुलस्थितिः। तथैव परिपाल्योऽसौ यदावशमुपागतः।।
4. भृगुरत्रिर्वसिष्ठश्च विश्वकर्मा मयस्तथा। नारदोनग्नचिच्चैव विशालाक्षः पुरन्दरः। ब्रह्मा कुमारो नन्दीशः शौनको गर्ग एव च। वासुदेवोऽनिरुद्धश्च तथा शुक्रबृहस्पती।। अष्टादशैते विख्याता वास्तुशास्त्रोपदेशकाः।। मत्स्यपुराणे–252/2–4।